पीड़या। प्रतिरूपेण कृत्रिमरत्नादिना। साहसेन समुद्रयानगिर्य्यारोहणादिना। व्याजेन ब्राह्मणवेशेन शूद्रादिना। तच्च तामसम्॥ * ॥ राजसधनं यथा,—

'कुसीदकृषिवाणिज्यशुल्कशानानुवृत्तिभिः।
कृतोपकारादाप्तञ्च राजसं समुदाहृतम्॥'

अनुवृत्त्या सेवया॥ * ॥ सात्त्विकधनं यथा,—

'श्रुतशौर्य्यतपःकन्याशिष्ययाज्यान्वयागतम्।
धनं सप्तविधं शुद्धं मुनिभिः समुदाहृतम्॥'

श्रुतेनाध्ययनेन। शौर्य्येण जयादिना। तपसा जपहोमदेवार्च्चादिना। कन्यागतं कन्यया सहागतं श्वशुरादेर्लब्धम्। शिष्यागतं गुरुदक्षिणादिना। याज्यागतं आर्त्विज्यलब्धम्। अन्वयागतं दायादेभ्यो लब्धम्। शुद्धं सात्त्विकम्।" इति शुद्धितत्त्वे देवलनारदौ॥ * ॥ धनप्रयोगनक्षत्राणि यथा, अश्विनी। पुनर्व्वसुः। पुष्यः। उत्तरफल्गुनी। हस्ता। पूर्व्वाषाढ़ा। उत्तराषाढ़ा। श्रवणा। धनिष्ठा। शतभिषा। उत्तरभाद्रपत्। रोहिणी। इति ज्योतिषम्॥ * ॥ धनप्रयोगनिषेधो यथा,

"आर्द्रं यमद्वन्द्वमहित्रयञ्च
शक्रद्वयं वातयुगं महेशः।
कार्य्यो न चैतेषु धनप्रयोगो
दत्तो गतो याद्यमृक्षं न देयम्॥"
इति समयप्रदीपः॥

अर्थप्रशंसा यथा,—

"अर्थेभ्योऽथ प्रवृद्धेभ्यः संवृत्तेभ्यस्ततस्ततः।
क्रियाः सर्व्वाः प्रवर्त्तन्ते पर्व्वतेभ्य इवापगाः॥
अर्थेन हि विमुक्तस्य पुरुषस्याल्पचेतसः।
विच्छिद्यन्ते क्रियाः सर्व्वा ग्रीष्मे कुसरितो यथा॥
सोऽयमर्थं परित्यज्य सुखकामः सुखैधितः।
पापमाचरते कर्त्तुं तदा दोषः प्रवर्त्तते॥
यस्यार्थास्तस्य मित्राणि यस्यार्थास्तस्य बान्धवाः।
यस्यार्थाः स पुमान् लोके यस्यार्थाः स च पण्डितः॥
यस्यार्थाः स च विक्रान्तो यस्यार्थाः स च
बुद्धिमान्।
यस्यार्थाः स महाबाहुर्यस्यार्थाः स गुणाधिकः॥
अर्थस्यैते परित्यागे दोषाः प्रव्याहृता मया।
राज्यमुत्सृजता धीर! येन बुद्धिस्त्वया कृता॥
यस्यार्था धर्म्मकामार्थास्तस्य सर्व्वं प्रदक्षिणम्।
अधनेनार्थकामेन नार्थः शक्यो विचिन्वता॥
हर्षः कामश्च दर्पश्च धर्म्मः क्रोधः शमो दमः।
अर्थादेतानि सर्व्वाणि प्रवर्त्तन्ते नराधिप॥
येषां नश्यत्ययं लोकश्चरतां धर्म्मचारिणाम्।
तेऽर्थास्त्वयि न दृश्यन्ते दुर्दिनेषु यथा ग्रहाः॥
इति रामायणे युद्धकाण्डे श्रीरामं प्रति श्रीलक्ष्मण-
वाक्यम्॥ * ॥

अर्थनिन्दा यथा,—

"अर्थमनर्थं भावय नित्यं
नास्ति ततः सुखलेशः सत्यम्।
पुत्रादपि धनभाजां भीतिः
सर्व्वत्रैषा विहिता नीतिः॥"

इत्यादि मोहमुद्गरे द्रष्टव्यम्॥ * ॥

अनुग्रहार्थं भगवता धनहरणम्। यथा,—

"राजन् यमनुगृह्णामि हरिष्ये तद्धनं शनैः।
ततोऽधनं त्यजन्त्यस्य स्वजना दुःखदुःखितम्॥"
इति श्रीभागवतम्॥

धनकेलिः, पुं, (धनैः केलिः क्रीड़ा यस्य।) कुबेरः। इति त्रिकाण्डशेषः॥

धनच्छूः, स्त्री, (धनं छ्यति नाशयतीति। छो य लूनौ+बाहुलकात् क्तः।) करेटुपक्षी। इति त्रिकाण्डशेषः॥

धनञ्जयः, पुं, (धनं जयति सम्पादयतीति। जि+खच्+मुम्। "धनमिच्छेत् हुताशनात्।" इत्युक्तेरस्य तथात्वम्।) अग्निः। चित्रकवृक्षः। इत्यमरः। १। १। ५६॥ (धनं जयति अरीन् निर्जित्य अर्ज्जयतीति। जि+खच्+मुम् च।) अर्ज्जुनः। (अस्य निरुक्तिर्यथा, महाभारते। ४। ४२। १३।

"सर्व्वान् जनपदान् जित्वा वित्तमाश्रित्य केवलम्।
मध्ये धनस्य तिष्ठामि तेनाहुर्मां धनञ्जयम्॥")

नागभेदः। स तु जलाशयाधिपतिः। (यथा, महाभारते। २। ९। ९।

"कम्बलाश्वतरौ नागौ धृतराष्ट्रबलाहकौ।
मणिमान् कुण्डधारश्च कर्कोटकधनञ्जयौ॥")

देहमारुतः। स च शरीरव्याप्यपञ्चवायुन्तर्गतः। इति मेदिनी। ये, १२०॥ ("धनञ्जयः पोषणकरः।" इति वेदान्तसारः। ३३॥

"न जहाति मृतञ्चापि सर्व्वव्यापी धनञ्जयः॥"
इति सुबोधिनी॥)

"धनञ्जयस्तथा घोषे महारजतवर्णकः।
ललाटे चोरसि स्कन्धे हृदि नाभौ त्वगस्थिषु॥"

इति शारदातिलकटीकायां राघवभट्टः॥ अर्ज्जुनवृक्षः। इति रत्नमाला॥ * ॥ (गोत्रविशेषः। तद्वंशीये, त्रि। यथा, महाभारते। २। ३३। ३४।

"धनञ्जयानामृषभः सुसामा सामगोऽभवत्॥")

विष्णुः। यथा, महाभारते। १३। १४९। ८३।

"अनिर्द्देश्यवपुर्विष्णुर्वीरोऽनन्तो धनञ्जयः॥"
"यत् दिग्विजये धनं प्रभूतं आजयत्तेन धनञ्जयः।
'पाण्डवानां धनञ्जयः।' इति भगवद्वचनात्।"

इति शाङ्करभाष्यम्॥ षोड़शद्वापरस्य व्यासः। यथा, देवीभागवते। १। ३। ३०।

"त्रयोदशे पञ्चदशे षोड़शे तु धनञ्जयः॥")

धनदः, पुं, (धनं दयते पालयतीति। दे ङ पालने+"आतोऽनुपसर्गे कः।" ३। २। ३। इति कः।) कुबेरः। इत्यमरः। १। १। ७२॥ (यथा, देवीभागवते। ५। ३। ४०।

"त्रिविष्टपं ग्रहीष्यामि जित्वेन्द्रं वरुणं यमम्।
धनदं पावकञ्चैव चन्द्रसूर्य्यौ विजित्य च॥"

ब्रह्मा अस्य तपसा सन्तुष्ट एनं धनेशं चकार। यथा, अध्यात्मरामायणे। ७। १। ३८।

"ददौ तत्तपसा तुष्टो ब्रह्मा तस्मै वरं शुभम्।
मनोऽभिलषितं तस्य धनेशत्वमखण्डितम्॥")

हिज्जलवृक्षः। इति राजनिर्घण्टः॥ (धनदः आश्रयित्वेनास्त्यस्येति अच्। हिमवत एकदेशः। यथा, महाभारते। १३। १९। २६।

"धनदं समतिक्रम्य हिमवन्तञ्च पर्व्वतम्॥"

धनं ददातीति। दा+कः।) दातरि, त्रि। इति मेदिनी। दे, ३२॥ (यथा, कामन्दकीयनीतिसारे। ३। २३।

"उद्वेजयति भूतानि क्रूरवाक् धनदोऽपि सन्॥")

धनदाक्षी, स्त्री, (धनदस्य कुबेरस्य अक्षि इव पिङ्गलं पुष्पं यस्याः। षच् समासे। स्त्रियां ङीप्।) लताकरञ्जः। इति राजनिर्घण्टः॥

धनदानुजः, पुं, (धनदस्य कुबेरस्य अनुजः कनिष्ठः।) रावणः। इति शब्दरत्नावली॥ (यथा, रघुः। १२। ५३।

"निग्रहात् स्वसुराप्तानां वधाच्च धनदानुजः।
रामेण निहितं मेने पदं दशसु मूर्द्धसु॥")

धनदायी, [न्] पुं, (धनं ददाति उपासकायेति। दा+णिनिः। "धनमिच्छेत् हुताशनात्।" इति वचनादेवास्य तथात्वम्।) अग्निः। इति शब्दरत्नावली॥ धनदातरि, त्रि॥

धनन्दा, स्त्री, (धेन धनेन नन्दं आनन्दं ददातीति। दा+कः।) बुद्धशक्तिभेदः। इति त्रिकाण्डशेषः॥

धनपतिः, पुं, (धनानां पतिः।) कुबेरः। इति धनञ्जयः॥ (यथा, महाभारते। २। १२। ३।

"तथा धनपतेर्यक्षा गुह्यका राक्षसास्तथा॥")

अस्य उत्पत्तिर्यथा,—

महातपा उवाच।
"शृणु चान्यां वसुपतेरुत्पत्तिं पापनाशिनीम्।
यथा वायुः शरीरस्थो धनदः सम्बभूव ह॥
आद्यं शरीरं यत्तस्मिन् वायुरन्तःस्थितोऽभवत्।
प्रयोजनान्मूर्त्तिमत्त्वमादिशन् क्षेत्रदेवताः॥
तन्नाम्नूर्त्तस्य वायोस्तु उत्पत्तिः कीर्त्त्यते मया।
तां शृणुष्व महाभाग! कथ्यमानां मयानघ!॥
ब्रह्मणः सृजतः सृष्टिं मुखाद्वायुर्विनिर्ययौ।
प्रचण्डशर्करावर्षी तं ब्रह्मा प्रत्यषेधयत्॥
मूर्त्तो भवस्व शान्तश्च तन्नोक्तो मूर्त्तिमान् भवन्।
सर्व्वेषाञ्चैव देवानां यद्वित्तं फलमेव च॥
तत् सर्व्वं पाहि येनोक्तं तस्माद्धनपतिर्भवेत्।
तस्य ब्रह्मा ददौ तुष्टस्तिथिमेकादशीं प्रभुः॥
तस्यामनग्निपक्वाशी यो भवेन्नियतः शुचिः।
तस्मास्तु धनदो देवस्तुष्टः सर्व्वं प्रयच्छति॥
एषा धनपतेर्मूर्त्तिः सर्व्वकिल्बिषनाशिनी।
य एतां शृणुयाद्भक्त्या पुरुषः पठतेऽपि वा॥
सर्व्वकामानवाप्नोति स्वर्गलोकञ्च गच्छति॥"
इति वराहपुराणम्॥

धनपिशाचिका, स्त्री, (धने पिशाचिकेव।) धनाशा। तत्पर्य्यायः। तृष्णा २। इति हारावली। १२५॥

धनपिशाची, स्त्री, (धने पिशाचीव।) तृष्णा। धनलोभः। इति त्रिकाण्डशेषः॥

धनप्रिया, स्त्री, (धनवत् प्रिया।) काकजम्बूः। इति राजनिर्घण्टः॥